Chapter-3

# तृतीय-परिच्छेदः

## (आलोच्यविषयस्य स्वरूपानुसन्धानात्मकः)

i. पाणिनिव्याकरणस्य परिचयः।

ii. हेमव्याकरणस्य परिचयः।

(पृष्ठसंख्या-४६ तः ७४ पर्यन्तम्)

॥ ॐ ॥

# तृतीयपरिच्छेदः

## ॥ पाणिनिव्याकरणस्य परिचयः ॥

विश्वेस्मिन् विश्वसाहित्ये वेदानां प्राचीनता सर्वस्वीकृता वर्तते। अतः भारतीय-परम्परायां प्रत्येकविषयस्य सम्बन्धः वेदैः सह क्रियते। अतः व्याकरणविषयस्याऽपि सम्बन्धः तथा अस्य श्रोतः सर्वप्रथमं वेदे एव अन्वेषणीयः।

वेदाङ्ग इति कथनेन स्पष्टं भवति छन्दनिरुक्तव्याकरणज्योतिषम् एतद् षडङ्ग-रुपेण वैदिकसाहित्ये सुप्रसिद्धं विद्यते। एतेषां षडङ्गानां मध्ये व्याकरणं प्रमुखं विद्यते। उक्तञ्च–'मुखं व्याकरणं स्मृतम्'। तेषां षडङ्गानां मध्ये शिक्षा तथा निरुक्तोऽपि व्याकरणस्य पुरक एव, व्याकरणे तयोः अन्तर्भावः साम्प्रति दृश्यते। भर्तृहरिणापि अस्य श्रेष्ठता स्ववाक्यपदीयग्रन्थे प्रतिपादिता 'प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः'।

परन्तु! अद्यत्वे समुपलभ्यमानेषु शब्दानुशासनेषु पाणिनीयशब्दशास्त्रं सर्वाङ्ग-सम्पन्नं विद्यते। भगवता शब्दविद्याचार्येण विरचितमष्टकं वैपुल्येन क्रमिकव्याख्यानेनाऽनतितरासाधारणकल्पनेन च समुपलभ्यमानं निखिलमपि शब्दानुशासनमाश्चर्यान्वितं दृश्यते। आचार्येण व्याकरणस्य तादृशं निर्माणपरिपाटवं प्रकटितं येन संस्कृतभाषायाः सकलान्यपि शरीराणि प्रकाशितान्यभूवन्। पाणिनिनिर्मितशब्दशास्त्रस्य सोपानस्य साहाय्येन दुरवगाहात् शब्दसागरात् तानि तानि दर्शनादिरत्नानि समधिगन्तुं न केनापि मनागपि काठिन्यमनुभूयते। अद्यत्वे संस्कृतभाषायां प्रभूतः प्रभावः पाणिने-रनुलक्ष्यते इत्यत्र नास्ति विप्रतिपतिः। मन्ये तस्यैव विमलमानसस्य वीतकल्मषस्य महामुनेः माहात्म्येनामरभारती कालकवलिता नाऽभूत्।

विश्वप्रसिद्धमहर्षियास्कस्य काले एव वैदिकभाषायुगः प्रायः समाप्तिमगात्। अभिनवा ग्रन्थाः प्रत्यग्रा अध्ययनविषयाः किम्बहुनाः शब्दा अपि नवनवाः सर्वतः प्रादूरभूवन्।

तदात्वे संस्कृतभाषा प्रतीच्यामाकम्बोजादाकच्छ-सौराष्ट्रात् अवाच्याया गोदावरीतटाद् इति यावत् प्राच्यम् आकलिङ्गसमन्तात् आसामप्रान्तस्य सूरमानदी-समीपपर्वतप्रदेशपर्यन्तमित्यर्थः उदीच्यामाहिमालयाच्च विस्तृताऽऽसीत्। एतत्

सर्वं पाणिनीयाष्टकस्य भौगोलिकनिदर्शनेन पर्याप्तरुपेण अनुभवितुं शक्यते। सम्भाव्यते चैतदपि यत् तावति विशालभूभागे तत्तत् प्रदेशस्यापि तदानीं केचन वाग्व्यवहाराः जनैराद्रियमाणाः स्युरेव किन्तु चक्रवर्तितत्वं देवगिर एवासीदित्यत्र नास्ति मनागपि सन्देहः।

यद्यपि ततः प्राक्तनैः तथा पश्चादनेकैः शब्दविद्याचार्यैः समासादितः सार्वभौम-पदवीं संस्कृतभाषां नियन्तुं सर्वतो भावेन प्रयतितमासीत्, तथापि तेषां नियमाः न हि सर्वाङ्गसम्पन्ना आसन्। सम्भवतः परस्परविरोधमावहन्तोप्यासन्। अतस्ते नियमाः विदुषां मनांसि सम्यङ् न परितोषयितुं समर्था अभूवन्। आचार्यपाणिनिस्तु संज्ञाविधायकानि सूत्राणि विभज्य उत्सर्गापवादयो विषयविभागं विधाय परस्परस-म्भाव्यविरोधं पर्यालोच्य परिहृत्य च सूत्राणि प्राणयन्। अतोऽत्र न ते दोषाः सम्भवन्ति अतः उक्तं पतञ्जलिना – 'प्रमाणभूताऽऽचार्या दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुखः उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म'।

# पाणिनीयव्याकरणस्य संक्षिप्तमितिवृत्तम्

**'दैवीम् वाचमजनयन्त देवास्तां विश्वरुपां पशवो वदन्ति'[१]**

सर्वेषां सुहृदयानां सुचिन्तकानां सुविदितमेवैतत् यल्लोके स्वाभिप्रायप्रकाशनाय, वाग्व्यवहारसम्पादनाय विचाराणाम् आदानप्रदानाय सर्वैरिव मनुजैः सार्थकवर्णसमूहरुपा केवलं भाषा एव मुख्यतया आश्रीयते चाकथ्यते चा तासु-तासु भाषासु उपयुज्यमानानां तद्गतशब्दानां अर्थरुपा शक्तिः न यावत् वेत्तृणां सञ्जायते न तावत् तेषां शाब्दबोधः सम्भवितुम् अर्हति। एवञ्च तत्तदर्थविषयकं ज्ञानं शाब्दबोधे सहकारिहेतुत्वेन सन्तिष्ठते इति विदुषां मतम्।

पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी[२]।।

तत्रः सर्वैः भाषाविद्भिः स्वीकृतमेतत् यत् व्याकरणमेवेदानीं स उपायः, यः मुख्यत्वेन शक्तिग्राहकरुपेण अवशिष्यते। तथा चोक्तम्–

शक्तिग्रहं व्याकरणोपमानकोशाप्त वाक्यात् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सामर्थ्यतः सिद्धपदस्य वृद्धाः[३]।।

कारिकायामस्यां व्याकरणमेव आदौ पठितत्वात् अन्येभ्यः शक्तिग्राहकोपायेभ्यः प्रमुखत्वमुपैति। मुख इव मुख्यत्वात् च प्रधानत्वमुपयाति। अत एव षट्सु वेदाङ्गेषु 'मुखं व्याकरणं वेदस्य'[४] इत्युक्तम्। तथा च – प्रधानं च षट्सु अङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवतीति पातञ्जलमहाभाष्ये निगदितम्।

१. ऋक्. ८/१००/११।
२. बृहच्छब्देन्दुशेखरस्य भूमिकातः उद्धृतम्।
३. तदैव।
४. मुख्यं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते।
निरुक्तं श्रोत्रमुदिष्टं छन्दसां विचितिः पदे।
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान् प्रचक्षते।। (पा. शि.)

शब्दव्युत्पादनेनैव वेदानामङ्गमुच्यते।
मुख्यं व्याकरणं यस्माद् शब्दमयोऽखिलः[१]।।

तदेवं व्याकरणाध्ययनमन्तरा न कस्याश्चिदपि भाषायां खलु अधिकारो भवितुं क्षमः। न च व्याकरणादृते कस्या अपि भाषायाः रक्षणं सम्भवति अतो व्याकरणं विना भाषा अपूर्णा असम्बद्धा वा स्यादित्येतन्मतं पुरा देवैरपि स्वकीय भाषामधिकृत्य अनुभूतम्। अतस्तैरिन्द्रः प्रार्थितः-इमां नो वाचं व्याकुरु, तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुद्यते[२]। सायणाचार्यः ऋग्भाष्यस्योपोद्घाते इमं व्याख्यन् लिखति – ताम् अखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययविभागं सर्वत्राकरोत्। तत्तथा बृहदारण्यकोपनिषदि–

तद्धीदं तर्ह्यव्याकृतमासीत्, तन्नामरुपाभ्यामेव व्याक्रियतासौ नामायमिदं रुप इति[३]।

इदमेव ऐन्द्रं व्याकरणं लोके व्याकरणपरम्पराया मूलभूतम्।

देवानां वाक् दैवी वाक् संस्कृतभाषा चेत्यर्थान्तरम्। सा च प्राच्ययुगे व्यावहारिकी भाषा आसीदित्यत्र ऐतिह्यं साक्षि। तथा च 'य एव लौकिकास्त एव वैदिकास्त एव च तेषामर्थाः[४]'। इति शबरस्वामिनः वचनात् न केवलं लौकिकानां किमुत वैदिकानामपि शब्दानां साधकं व्याकरणमेव। अत एव पातञ्जलमहाभाष्ये शब्दानुशासनं क्रियते। केषां शब्दानाम्? लौकिकानां वैदिकानां च[५], इत्युक्तम् तथा च पतञ्जलिना 'रक्षार्थं वेदानामध्येयं व्याकरणम्[६]' इति व्याकरणाध्ययनस्य प्रमुखत्वं प्रयोजनं 'वेदानां रक्षा' इत्येव आकाङ्क्ष्यते। किं बहुना 'सर्वं वेदात् प्रसिद्ध्यति' वेदा एव व्याकरण-गंगायाः प्रवाहकाः हिमालयभूतास्सन्ति। वेदेषु वेदप्रतिपादितेषु व्याख्यानग्रन्थेषु ब्राह्मणादिषु व्याकरणस्योल्लेखः सुस्पष्टं दरीदृश्यते। उदाहरणैकरुपेण पतञ्जलिनाचार्येण

१. सा. भू.
२. तै. सं. ६/४/७/३।
३. बृ. उ. १/४/७।
४. मीमांसा १/३/३० सूत्रव्याख्यावसरे।
५. पस्पशाह्निके।
६. परस्पशाह्निके।

महाभाष्ये व्याकरणाध्ययनप्रयोजनावसरे 'चत्वारि शृंगा[१]', 'चत्वारिवाक्[२]', 'उतत्वः[३]', 'सक्तुमिव[४]', 'सुदेवोऽसि[५]' इत्येतासां पञ्चर्चा व्याकरणशास्त्रपरकीया व्याख्या- वेदा एव व्याकरणस्य आदिभूता इति विवर्त्तितम्। नैषः महामतेः महर्षिपतञ्जलेः अभिनवमन्त्रार्थः, अपितु तस्मात् प्राक्वर्त्ती महर्षियास्कोऽपि निरुक्ते[६] स्थालीपुल- कन्यायेन चत्वारि वाक्[७] मन्त्रैकस्य व्याख्या व्याकरणपरकीया एव करोति। अपि च गोपथब्राह्मणे – 'ओङ्कारं पृच्छामः, को धातुः, किं प्रातिपदिकम्, किं नामाख्यातम्, किं लिङ्गम्, किं वचनम्, का विभक्तिः, कः प्रत्ययः, कः स्वरः, उपसर्गः, निपातः, किं वै व्याकरणं, को विकारः, को विकारी, कतिमात्रः, कतिवर्णः, कत्यक्षरः, कतिपदः .........................'।

तस्मात् षड्विभक्तयः इति मैत्रीयणीसंहितायाम्[८]।
सप्तधा वै वागवदत् इति ऐतरेयब्राह्मणे[९]।।

तदेवं कतिपयैरुदाहरणैः व्याकरणस्य प्राचीनत्वं सिद्धयति।

## पाणिनीयं व्याकरणम् –

सर्वार्थां व्याकरणाध्वैयाकरण उच्यते।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा[१०]।।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम् 'व्युत्पत्त्या अनया लक्ष्य-लक्षणे व्याकरणमिति[११]' व्याकरणस्वरुपपरिचयः, शब्दानुशासनञ्चेति अर्थापरम्।

१. ऋ. ४/५८/३।
२. ऋ. १/१६४/५।
३. ऋ. १०/७१/४।
४. ऋ. १०/७१/२।
५. ऋ. ८/६९/१२।
६. इदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते, निरु. १/५। इदमन्तरेण–व्याकरणमन्तरेण इति।
७. निरु. १३/९।
८. मै. सं. १/७/३।
९. ऐ. ब्रा. ८/७१/८।
१०. महा. उ. अ. ४३ लघुशब्देन्दुशेखरस्य भूमिकातः उद्धृतम्।
११. परस्पशाह्निके।

SMT. HANSA MEHTA LIBRARY
THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA
The M.S. University of Baroda

तदुक्तं सारस्वतव्याकरणे –

शब्दानुशासनं नाम ख्यातं व्याकरणं हि तत्।
प्रकृतिप्रत्ययादीनां साधनेनोपकारकम्।।

एवञ्च व्याकरणं विविधविषयकान् लौकिकान् अलौकिकांश्च शब्दकदम्बान् व्याकुर्वत् बहुविधम् अखिलशास्त्रतत्वैः प्रवर्त्तितम् अभूदिति पुरातनसुधीजनसमुद्धृतग्रन्थावगाहनेन अवगम्यते। अथात्र पाणिनीयव्याकरणात् पूर्वम्–

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्[१]।।

एतेषां व्याकरणानां तत्तत्समये सुप्रसिद्धानामपि कालमाहात्म्येन अद्यत्वे दुर्लभा एव, नेदानीं पाणिनीयमन्तरा तेष्वेकमपि अस्मत्पाणितलं साध्वलंकरोति। पाणिनिमुनिप्रणीतं च तदष्टाध्यायीसूत्ररुपं व्याकरणमेव वर्त्तमानसमये समस्तलौकिकवैदिकशब्दानां स्वरानुशासनतया सर्वाङ्गपूर्णं, वेदाङ्गत्वं, व्यवहारभाजनम्, अध्ययनाध्यापनादौ लब्धप्रकर्षप्रचारं सर्वादृतं पुरोऽवतिष्ठते।

अथ कालेन बहवः शिष्या वर्षमुपाययुः।
एकोऽपि पाणिनिर्नाम जडबुद्धिरुपाययौ।।
शिष्यान्तरोपहासेन सावमानः स पाणिनिः।
शुश्रूषाक्लेशतो यातः कदाचित्तुहिनाचलम्।।
आराध्य तपसा तत्र विद्याकामः स शंकरम्।
प्राप व्याकरणं दिव्यं स च विद्यामुखं शिवम्।।
एवं व्याकरणं दिव्यं प्रबोधायाऽभ्यधात् पुनः।
पाणिनीयमधिष्ठाय शरीरं परमेश्वरः[२]।।

जनश्रुतिरेषा केषुचित् प्रचलिता विद्यते यत् पाणिनिः जडबुद्धिरासीत्। कालान्तरं सः विद्याकामः पाणिनिः तपसा शंकरम् आराध्य व्याकरणं दिव्यं प्राप इति।

१. श्रौतत्वविधिनामकवैष्णवग्रन्थे।
२. हरचरितचिन्तामणौ शब्दशास्त्रावतारतः उद्धृताः श्लोकाः।

महाभाष्यकार: पतञ्जलि: पाणिनिविषये लिखति–

'प्रमाणभूत आचार्यो दर्भपवित्रपाणि: शुचाववकाशे प्राङ्मुखे उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म[१]'।

तात्पर्यमेतत् यत् महर्षिपाणिनिना तत्कालीनान् यावदुपलब्धानेकानेकग्रन्थान् गुरुमुखात् अध्ययनानन्तरमेव महता श्रमेण, तपसा, ईशानुकम्पया च सर्वाङ्गपूर्णं व्याकरणमिदं व्यरचि। यथा चीनी यात्री श्यूआन् चुआङ् स्वसियुकिनामके ग्रन्थे लिखति—

ऋषि: पाणिनि: उपदेशं प्राप्य (अध्ययनादिकं विधाय) रहसि निर्जनस्थले गत्वा निरन्तरं प्रयतते स्म मनसा धिया च सर्वा शक्ति: तस्मिन् कार्ये (सूत्रप्रणयने) नियोजिता। तत्र शब्दभण्डारत: अनेकान् शब्दान् असञ्चयत्, १००० पद्येषु च सम्पूर्णां व्युत्पत्तिं विरच्य व्याकरणग्रन्थं निरमायि यत्र प्राचीनार्वाचीनं किमपि अत्यजन् समस्तं ज्ञानं सन्निवेशितम्[२]।

त्रीणि सूत्रसहस्राणि तथा नवशतानि च।
षण्णवतिश्च सूत्राणां पाणिनि: कृतवान् स्वयम्[३]।।

अर्थात् चतु:पादरुपं प्रत्यध्यायमिति अष्टस्वाध्यायेषु परिमितं ३९९६ सूत्रकुसुमानां स्रग्भूतं व्याकरणमेतन्महच्छास्त्रं तस्मिन् पुरातने युगे जन्म लेभे यदा वैदिकभाषाया: काल: समाप्तप्राय एवासीत्। नवीना: - नवीना: गद्यपद्यमया: ग्रन्था:, नूतना-नूतना भाषा, शैली प्रतिराज्यं शब्दार्थवैभिन्न्यं च प्रसरति स्म[४]। तदा पाणिनिना एकाग्रमनसा, सारग्राहिण्या, कुशाग्रमेधया, दृढपरिश्रमेण, सूक्ष्मेक्षिकया, सूत्ररचना-कौशल्येन प्राचीनव्याकरणसाहाय्येन अद्भुतम्, अद्वितीयम्, अतुलनीयम्, स्वोपज्ञम-कालकं व्याकरणं[५] निर्मितम्, येन संस्कृतभाषाविषये योऽपि शंकाकलङ्कपङ्कलेश:

१. महा. भा. १/१।
२. सं. व्या. शास्त्र का इतिहास (यु.मी.)
३. पा.भारत. १७ पृष्ठतमे।
४. पा. भारत. ५ पृष्ठतमे।
५. पाणिन्युपशमकालकं व्याकरणम् (का. २/४/२१।)

आसीत् तस्य प्रायः समाधानेनात्राभावि तथा वक्तुं शक्यते यत् भारतस्य भाषागत-परम्परायां साहित्यक्षेत्रे पाणिनिव्याकरणेन एकम् अभिनवयुगानुवर्त्तनं विहितम्, यत्र व्याकरणशास्त्रस्य अभिवृद्ध्यर्थं नवम्-नवम् कार्यजायत[१]। अत एव सर्वत्रैषोक्तिः-

'पाणिनीयं महत्सुविहितम्[२]', लोके विश्रुता, प्रसृता, यशोलब्धा च पाणिनिकृतिः। काशिकानुसारम् अनेनेव कारणेन सर्वस्मिञ्जगति पाणिनेर्नाम राराज्यते स्म। यथोक्तं काशिकायाम्-पाणिनिशब्दो लोके प्रकाशते[३], इति पाणिनि तत्पाणिनि इत्येतच्च कथनं सर्वत्र कर्णमुपैति स्म। एष महद्यशः, महती सफलता च नैव ईश्वरानुग्रहं विना सम्भवम्। एतस्मादेव कारणात् जनश्रुतिरेषा प्रचलिता यत् भगवतः शिवकृपया व्याकरणमिदं पाणिनिना लब्धमिति पाणिनिकालीनभारतवर्षनामके ग्रन्थे वासुदेवशरणअग्रवालमहोदयस्य कथनं साधुतमम्। अपि च युधिष्ठिर मीमांसक-महोदयेन स्वकीये संस्कृतव्याकरणशास्त्रेतिहासग्रन्थे एतदुल्लिखितम् यत्—

व्याकरणे शास्त्रे द्वौ सम्प्रदायौ तथाकालं प्रचलितौ, प्रसिद्धौ च—ऐन्द्रः, शैवश्च। तत्र कातन्त्रादिव्याकरणं ऐन्द्रसम्प्रदायस्य। शैवसम्प्रदायस्य च पाणिनीयं व्याकरणम्। शिव अर्थात् महेश्वरप्रोक्तव्याकरणस्योल्लेखः कतिपयेषु ग्रन्थेषु प्राप्यते। यथा पाणिनीय शिक्षायम् —

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः[४]।।

हेमबृहद्वृत्त्यवचूर्णिग्रन्थे

ब्राह्ममैशानमैन्द्रञ्च प्राजापत्यं बृहस्पतिम्।
त्वाष्ट्रमापिशलञ्चेति पाणिनीयथाष्टमम्[५]।।

१. संस्कृतव्याकरणशास्त्रेतिहासविमर्शः (ले. अशोकचन्द्र गौड)।
२. म.भा. ४/३/६६।
३. का. २/१/६।
४. इममेव श्लोकं प्रमाणीकृत्य एतदुच्यते एत् अष्टाध्याय्याः प्रत्याहारसूत्राणि माहेश्वरसूत्राणि सन्तीति।
५. हैम्वबृहद. ३ पृष्ठांके

श्लोकेऽस्मिन् ऐशान अर्थात् ईशान (शिव) प्रोक्तव्याकरणस्य स्पष्टं वर्णनं विद्यते। सारस्वतव्याकरणभाष्येऽपि—

समुद्रवत् व्याकरणं महेश्वरे तदर्धकुम्भोद्धरणं बृहस्पतिम्।
तद्भागभागाच्च शतं पुरन्दरे कुशाग्रबिन्दूत्पतितं हि पाणिनौ।।

एवञ्च एतैः कैश्चित् प्रमाणैः निर्विवादरुपेण वक्तुं शक्यंते यत् शिवोऽपि एकः व्याकरणप्रवक्ता, वैयाकरणः, पाणिनेपूर्वभावी आसीत्, यस्योल्लेखः पाणिनीयाष्टके न प्राप्नोति। पुनरपि एतदपि स्फुट एव यत् पाणिनिना नैव शैवव्याकरणमधीतम्, अधीतं स्याच्चेत् अवश्यं कुत्रचित् शिवाचार्यस्योल्लेखः अष्टाध्याय्यां स्यात्।

शैवसम्प्रदाये पाणिनीयव्याकरणस्य सत्त्वात्, आद्यप्रवक्ता च तस्य सम्प्रदायस्य शिवः, अतः शिवकृपया व्याकरणमेतत् पाणिनिना लब्धमित्थंप्रकारेण जनश्रुतिः सार्थिका भवति। जनश्रुतेः नैतत् तात्पर्यम्, यत् शिवः नवपञ्चवारं ढक्कां (डमरु) ननाद[१] तर्हि तस्मात् प्रत्याहारसूत्राणि निःसृतानि–ततः पाणिनिः अष्टाध्यायीमारेभे। एतत् भवितुं शक्यते यत् पाणिनिना यानि प्रत्याहारसूत्राणि विरचितानि, तत्समान्येव शिवव्याकरणस्यापि प्रतयाहारसूत्राणि स्युरिति।

**महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य[२]**

महर्षिपाणिनिना निजप्रातिभज्ञानेन, आर्षचक्षुषा, सर्वतध्यानां यथावत् सूक्ष्मं निरीक्षणं विहितम्। तद्यथा प्रमाणैकरुपे – उदक् च विपाशः[३] अनेन विपाशः उत्तरे ये कूपाः तेषु अभिधेयेषु अण्प्रत्ययो भवति, विपाशः दक्षिणे च ये कूपाः तेषु अभिधेयेषु अण्प्रत्ययो भवति। उभयोरर्थयोः शब्दसिद्धिस्ति एकेनैव प्रकारेण भवति-दत्तेन निवृत्तः कूपः = दात्तः पुनरपि दक्षिणीयोऽयम् उत्तरदेशस्थोऽयं वा इत्यर्थभेदः

१. नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धान्नेतद्विमर्शः शिवसूत्रजालम्।।

२. का. ४/२/४४।

३. पा. सू. ४/२।

स्वरभेदादत्र विद्यते अञ्प्रत्यये कृते ञ्नित्यादिर्नित्यम्[1] आद्युदात्तः दात्तशब्दः उत्तरदेशे। अण्प्रत्यये च आद्युदात्तश्चं[2] अन्तोदात्तः, दात्तशब्दः दक्षिणदेशे प्रयुज्यते। एतादृशी आश्चर्यकारिणी मेधा या साधारणस्वरमपि नोपेक्षते, सा सूक्ष्मेक्षिका दृष्टिः पाणिनिं वैयाकरणजगति अग्रगण्यङ्करोति। अनेन सूक्ष्मेन निरीक्षणेन एतदपि स्वत आविर्भवति यत् पाणिनिना न केवलं सर्वग्रन्थानधीत्य सकलशास्त्रमन्थनं विधाय यथाश्रुतं यथाधीतं यथानुभूतानुसारं शलातुरग्रामे एकस्मिन्नेव आसने प्राङ्मुखे उपविश्य दिव्यसुमेधया अलौकिकं व्याकरणमदः प्रणीतम् अपितु—काषायपायिणो गान्धाराः, क्षीरपायिण उशीनराः, सौवीरपायिण वाह्लीका[3], साल्वजनपदे या ववागूः सा साल्विका, शवगतौ, रहि गतौ, हम्म गतौ दाप् लवने इत्यादयश्च धातवः यस्मिन् विषये पतञ्जलिः ब्रवीति महाभाष्ये—शवतिः गतिकर्मा कम्बोजेष्वेवे भाषितो भवीत, विकार एनमार्याः भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु। रंहतिः प्राच्यमध्यमेषु, गमिमेव तु आर्या प्रयुञ्जते। दातिर्लवनाथे प्राच्येषु दात्रमुदीच्चयेषु[9] इत्यादिविभिन्नदेशविषयकचर्चाभिः ज्ञायते यत् कृतभूरिपरिश्रमः पाणिनिः पूर्वं स्वजनपदात् निर्गत्य सर्वेषु देशुषु विदेशेषु[10] महतीं यात्रां विधाय, सर्वत्र सञ्चर्य तत्रत्यायां प्रचलितायां भाषायां प्रविश्य, तत्तद्दे-शीयायाम् उदात्तानुदात्तस्वरितरुपायां शैल्यां प्रविश्य, तत्रस्थेषु जनेषु—जनविचारेषु प्रविश्य, तत्तददेशस्थपदार्थेषु प्रविश्य, तत्रोषितजनानाम् आचार-व्यवहार-निवास-

१. पा. सू. ६/१/१८१
२. पा. सू. ३/१/३
३. का. ३/२/८१
४. का. ४/२/१३६
५. पा. धा. भ्वा. ४८०
६. पा. धा. भ्वा. ४८७
७. पा. धा. भ्वा. ३१५
८. पा. धा. अ. ५२
९. म. भा. परस्पशाह्निके।
१०. अंग-बंग-कोशल-मगध-कलिंग-कम्बोज-प्राच्योदीच्यादिदेशविदेशेषु। येषां देशानां वर्णनं कतिपयेषु सूत्रेषूपलभ्यते।

-अदन-पान-वस्त्राभूषणादिधारण-अध्ययन-अध्यापन इत्यादि-सर्वदेनन्दिन-कृत्यानां तेषां व्यावसायानां तत्रस्थ-गोषवाचक-स्त्रीवाचक-व्यक्तिवाचक-देशवाचक-नगर वाचक-ग्रामवाचकानां च शब्दानां सम्यक् परिशीलनं विधाय तदा व्याकरणं रचयामास। किं बहुना? विभिन्नप्रदेशस्थभाषाभिः सह पाणिनिना जनविश्वासस्थानीय प्रथाधारेणापि शब्दाः संकलिताः। यथा भारतस्य पूर्वीभागे उद्दालकपुष्पभञ्जिका, वारणपुष्पप्रचायिका, शालभञ्जिका, तालभञ्जिका इत्यादिर्या उद्यानक्रीडाः तदानीं प्रचलिताः तासां नाम-करणप्रथाविषयेऽपि सुत्रेषु चर्चा विहिता[1]। केषाञ्चित् यक्षाणां नामोल्लेखः अपि सूत्रेषु विद्यते[2] यस्मिन् एकः विशालनामको यक्षः जनविश्वासाधारितः अस्ति। नैतावदेव एतस्मिन् व्याकरणे भूगोल-इतिहास-मुद्राशास्त्र-सामाजिकस्थिति-इत्यादीनामपि सूक्ष्मं वर्णनं दरीदृश्यते।

यद्यपि आचार्यः पाणिनिः प्राचीनव्याकरणं सम्यक् परिशील्य तत्रत्यं ग्राह्यमंशमपि संकलय्य च स्वकीयं शब्दशास्त्रं प्रणिनाय, तथापि तत्र केवलम् अनुकरणमात्रेव, अपितु प्राचीनानां वैयाकरणानां मते चतुर्दशस्वरा सन्ति। पाणिनीयशिक्षायाञ्च एकविंशतिस्वराः विद्यन्ते[3], तथापि पाणिनिः स्वयं केवलं नवस्वरान् स्वीकरोति। तथा च पाणिनिमते त्रयस्त्रिंशत् व्यञ्जनानि सन्ति, तेषां वर्णसमाम्नायस्य क्रमः लौकिकक्रमाद् भिद्यते। एवं धातुषु प्रत्ययेषु च स्वरवृद्धिगुणादि कार्यार्थम् इत्संज्ञकान् वर्णान् निवेशयति, प्रत्याहारार्थञ्च इत्संज्ञकान् वर्णान् पठति वर्णसमाम्नाये पाणिनिः। एवञ्च भगवता पाणिनिना घु, घ, वृद्ध, इत्, नदी, भ, युवा, तद्राज, कृत्यप्रभृतयः संज्ञाश्च स्वोपज्ञया सम्यगवबोधनार्थं कल्पिताः। तेनैतत् वक्तुं पारयामः यत् पाणिनिः प्राचीनव्याकरणेभ्यः सर्वथा साहाय्यं गृहीत्वा अपि सर्वाङ्गपूर्णं नूतनतमं व्याकरणं रचयामास।

**शोभना खलु पाणिनेः सूत्रकारस्य कृतिः[4] —**

पाणिनेः सूत्राणां स्मिततमां भाषां यदा पश्यामो वयं तर्हि यदा-कदा यत्र-तत्र सा अतीव हृदयग्राहिणी, सहजा, सरला च अस्मन्मस्तिष्कतले स्वत एव अर्थसहितं

१. का. २/२/१७, ३/३/१०९, ६/२/७४

२. पा. सू. ५/३/८४

३. 'स्वरा विंशतिरेकश्च' पा. शि. ४

४. का. २/३/६६

सन्तिष्ठते। यथा–सोममर्हति यः[१]। धान्यानां भवने क्षेत्रे खञ्[२]। क्षेत्रियच् परक्षेत्रे चिकित्सयः[३]। साक्षाद् द्रष्टरि संज्ञायाम्[४]। श्रोत्रियंश्छन्दोऽधीते[५]। संशयमापन्नः[६]। योजनं गच्छति[७]। इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा[८]– सूत्रमिदम् 'इन्द्रियम्' इत्यपि कर्त्तुं शक्यते स्म पाणिनिना, पुनरपि दैर्घ्यभूतं सूत्रं पाणिनीयाष्टकम् अपूर्वां कृतिं घोषयति। इन्द्रियशब्दः कम्–कमर्थं वक्तुं समर्थं, अथवोपनिषद्–ब्राह्मणादिग्रन्थेषु कस्मिन्–कस्मिन्नर्थे सः प्रयुज्यते तत्प्रदर्शयितुम् उदारमना पाणिनिः एतां शैलीमुपगच्छति।

विचित्रा च पाणिनेः कृतिः – कुत्रचित्तु 'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' उक्त्यनुरुपं सत्यपि लाघवे सूत्राणां सारल्यहेतुना विस्तृता अपि शैली स्वमर्थं स्वतः बोधयितुं प्रेरयति। पुनरपि आश्चर्यतमेयं सुकृतिरिति नाविशयोक्तिः यत् महच्छब्दार्णवस्य एकस्मिन् घटे निबन्धनम्, दैवीशक्तिरेवैषा काचित्। अत एव मोनियरविलियमः प्राह – मानवमस्तिष्कस्य प्रतिमाया आश्चर्यतमोऽयं भागः संस्कृत-व्याकरणम् (अष्टाध्यायीग्रन्थः) इति।

## पाणिनेराचार्यस्य सिद्धम् –

एवञ्च भगवतः पाणिनेः व्याकरणस्य ऐतिह्याध्ययनेन ज्ञायते यत् प्राचीनैः ऋषिभिः वेदादिमाध्यमेन प्रकटीकृतं संस्कृतव्याकरणं कतिपयानामृषीणां समायातं यच्च पाणिनिना स्वोपज्ञया संक्षिप्तं पुनरपि विस्तृतं नवीनतमं रुपं व्यदायि। यच्चेदानीं सर्वेषां प्राचीनार्वाचीनानां व्याकरणानां शिरोऽभूतं विद्यते। तथाकर्तुं वर्णनातीतं

१. पा. सू. ४/४/१३७
२. पा. सू. ५/२/१
३. पा. सू. ५/२/९२
४. पा. सू. ५/२/९१
५. पा. सू. ५/२/८४
६. पा. सू. ५/१/७२
७. पा. सू. ५/१/७३
८. पा. सू. ५/२/९३

महच्छ्रमः भगवता विहितः। नितान्तं सत्यमेतत् संस्कृतस्य पर्यायभूतं पाणिनीयव्याकरणं, संस्कृतजीवनं यावत् भूतले स्थास्यति। अत एव तु अन्यैः व्याकरणैः इदानीं लुप्तेऽपि कुतश्चित् कस्यापि सारस्वतव्याकरणादिग्रन्थस्य प्राप्तत्वेऽपि न तत्र कापि श्रद्धा समुपजायते न च व्याकरणं पाणिनीयव्याकरणविषये आवश्यकत्वम् उपभजति। सर्वाङ्गपूर्णं व्याकरणमिदं समुद्रवत् गभीरं पुनरपि सरलं वै मनोहरञ्च।

भारतीयवाङ्मये यत् यावत् प्राचीनं तत्तावदेव विस्तृतम्। यद्यावदर्वाचीनं तत्र तावदेव संक्षिप्ता प्रवृत्तिर्दृश्यते। तयैव प्रवृत्त्या सूत्रशैली प्रादुर्बभूव यस्याः सम्पूर्णता पाणिनेः पाणिनीयाष्टके सम्पन्ना, अत एव राजशेखरेण काव्यमीमांसायाम् –'तद्धितशास्त्रप्रायोवादो यदुत तद्धितमूढाः पाणिनीयाः[१]' अर्थात् तद्धितप्रकरणम् अपेक्षाकृतं संक्षिप्तमित्युक्तम्।

एतदत्राहमन्ते वक्तुं प्रभवामि – नाहं मन्ये पाणिनिः जडबुद्धिरासीदिति। कालिदास-बोपदेवादिमहतां तथा बाल्यकालः श्रूयते परं न तावत्तेषां व्यासकार्यक्षेत्रम् यथा पाणिनिना भाषाशास्त्ररुपं जगद्वशीकृतम्। यस्मात् कारणात् पाणिनीयं व्याकरणं कृत्स्नेऽपि वाङ्मये निर्बाधगत्या विहरति। अत एव च पाणिनीयं व्याकरणं महतीं ख्यातिमार्जयत् वैयाकरणजगति लोकव्यवहारे च। दन्तकथानुसारम् आसीदपि च यदि पाणिनिः जडबुद्धिस्तर्हि भूयोभूयः आश्चर्यतमोऽयं विषयः यत् अमुना भूतपूर्व-जडबुद्धिना एतावत् महच्छब्दशास्त्रं प्रणायि यदर्थम् 'अनल्पमतिः आचार्यः[२]' इति पतञ्जलिः अन्ततः वक्तुं प्रभवति। तथा तु धन्योऽयं पाणिनिः न भूतो न भविष्यति उक्तिं सर्वथा सार्थयति, धन्या च सा दैवी शक्तिः या वरदहस्ताऽभूत् पाणिनये।

शब्दार्थसम्बन्धनिमित्ततत्त्वं वाच्याविशेषे ऽपि च साध्वसाधून्।
साधुप्रयोगानुमितांश्च शिष्टान्न वेद यो व्याकरणं न वेद।।

**पाणिनिकृतयः**

संस्कृतव्याकरणेतिहासमवलोकयामश्चेद्वयन्तर्हि कतिपयाः कृतयः महर्षिपाणिनेरिति

१. का. मी. अ. ६।
२. म. भा. १/४/५१।

ज्ञायते। तत्र सर्वप्रथमा सर्वोत्कृष्टा च रचना वर्त्तते अष्टाध्यायी। इयङ्कृतिः लौकिक-संस्कृतस्य सर्वोत्तमं व्याकरणम्, सहश्च वैदिकव्याकरणस्याप्यत्र प्राचुर्यम्। पाणिनिः सूत्रशैल्यां चात्यन्तसंक्षिप्ताक्षरैः स्वग्रन्थस्य रचनां कृतवान्। सूत्रशैली पाणिनिः पूर्वमेव परिष्कृताऽसीत्। तामेव सूत्रप्रद्धतिमनुसरति इयमष्टाध्यायी कृतिः अतः सूत्रकारः पाणिनिरित्युक्तिः प्रसिद्धा। तथा सुगठितानि एतानि सूत्राणि यत् एकस्य वर्णस्य मात्रायाश्च आनर्थक्यं परिवर्त्तनञ्चात्र न भवितुं शक्तम्। सम्भवञ्चा महाभाष्ये खलु तावत्–

तत्राशक्यं वर्णेनाऽप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण[१]। अपि च–

सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्[२]।

नास्त्यत्र सन्देहलेशः यत् पाणिनिरचनातः प्राक् व्याकरणशास्त्रस्य महान् विकासोऽभूत् परं येषां विभिन्नव्याकरणानां पृष्ठभूमौ पाणिनीयव्याकरणं निर्मितम्, ते सर्वे प्राचीनाः व्याकरणग्रन्थाः वर्त्तमानसमये कालकवलिताः, परं पाणिनेरष्टाध्यायी एव सा जनप्रिया कृतिर्या अद्यावधि विजयतेतमाम्। यस्यां कृतौ कालस्य भयंकर-प्रहारोऽपि विजयं न प्रापत्। अद्यापि सा कृतिः स्वरूपे विराजते।

## सर्ववेदपारिषदं हि इदं शास्त्रम्[३]

अष्टाध्याय्याः व्याकरणशास्त्रस्य प्रसिद्धः विश्वप्रियश्च व्याकरणग्रन्थः निर्मलां कीर्त्तिं विधुनोति पाणिनेः। अत एव मोनियर विलियम्समहोदयेनागादि–संस्कृतव्याकरणे तस्याः मानवबुद्धेः प्रतिभाश्चर्यकरी विद्यते, न केनापि विदुषा पाणिनिं विहाय ईदृशं व्याकरणशास्त्रं समुपस्थायि। हण्टरमतानुसारम् – संसारस्य व्याकरणेषु पाणिनेः व्याकरणं सर्वश्रेष्ठमस्ति, तस्य वर्णशुद्धता भाषा धात्वन्वयसिद्धान्ताः प्रयोगाश्चाद्वितीयाः सन्ति। बर्नेलमतानुसारम् – सर्वेभ्यः व्याकरणेभ्यः अतिशायिनीयं रचना।

१. म. भा. १/१/१।

२. म. भा. ६/१/१।

३. म. भा. २/१/५७।

अस्याष्टाध्यायीग्रन्थस्य नामविषये भाष्ये अष्टकपाणिनि-वृत्ति-सूत्रं[1]-महच्छास्त्रौध[2]-इत्यादिनामभिः व्यवहारः कृतः। प्राक्काले वैदिकशाखानाम-ध्ययनाय नियुक्ताः आचार्यकुलाः 'चरण' शब्देन व्यवहृता आसन्। प्रत्येकचरणस्य च एकः परिषद् भवति स्म। तस्यां परिषदि शिक्षा-व्याकरण-छन्द-निरुक्तादि-शब्दसम्बन्धि-विषयाणां विचारः क्रियते स्म। ततः अष्टाध्याय्याः स्थितिः विकसिता दृश्यते। ग्रन्थस्यास्य क्षेत्रं न केवलं-वैदिकपरिषद्पर्यन्तमेव सीमितम् अपितु सर्वासां चरण-परिषदां या उपादेयसामग्री आसीत् सा पाणिनिना स्वशास्त्रे गृहीता। अत एव पतञ्जलिना उच्यते-सर्ववेदपारिषदं हीदं शास्त्रम्। अर्थात् पाणिनेरष्टाध्यायी शास्त्रं सर्ववेदपरिषिद्भस्सह सम्बन्धं स्थापितत्वात् एवेह सूत्रेषु साहित्यिकशैल्याः वैभिन्यं दृश्यते तथाहि-बहुलम्, अन्यतरस्याम्, विभाषा, एकेषाम्, उभयथा, वा उदाहरणैक-मात्रमत्र। शोभना हृदयग्राहिणी चैषा शैली पाणिनिव्याकरण विदुषां पाठकानाञ्च मनांसि आवर्जयति। लक्ष्यलक्षणे व्याकरणप्रसंगे पाणिनिना केवलं सूत्राण्येव प्रोक्तानि न तु शब्दाः प्रोक्ताः।

अन्येऽपि पाणिनेः कृतयस्तथा - शिक्षा, धातुपाठः, गणपाठः, उणादिसूत्रपाठः लिंगानुशासनम्।

**सूक्तिग्रन्थे राजशेखरेण लिखितम्—**

आदौ व्याकरणं काव्यमनुजाम्बवतीजयम्-कथनमित्यनुसारं पाणिनिः जाम्ब-वतीजयनामकं काव्यमपि व्यरचि। एतेन ज्ञायते यत् पाणिनिः सुकविरप्यासीत्। प्राचीनवैयाकरणेषु पाणिनिरेव स वैयाकरणः यस्य काव्यस्रष्टृत्वं न केवलं वैया-करणनिकाये आबालवृद्धेषु प्रसिद्धः अपितु काव्यवाङ्मयस्येतिहासेऽपि मूर्द्धाभिषिक्तः।

जाम्बवतीविजयस्यैव नामान्तरं पातलाविजयम्। महाकाव्येऽस्मिन् भगवान् पाणिनिः श्रीकृष्णस्य पातालदेशे (ऋक्षदेशे) गत्वा ऋक्षराजस्य जाम्बवतः पुत्र्याः जाम्बवत्याः विजयस्य परिणयस्य च कथायाः वर्णनं करोति। काव्यं त्विदानीमनुपलब्धमेव।

१. म. भा. २/१/१।
२. म. भा. १/१/२।

पुनरपि काव्येऽस्मिन् न्यूनातिन्यूनाः अष्टादशसर्गाः विद्यन्त इति ज्ञायते यतोहि दुर्घटवृत्तिकार शरणदेवेन जाम्बवतीविषयस्य अष्टादशमसर्गस्योद्धरणं कृतम्[१]।

सूक्तिसंग्रहेषु पाणिनिनाम्नः अनेके पद्या उद्धृतास्सन्ति। यद्यपि पुरातत्ववेतृषु एष मतभेदः विद्यते यत् पद्या इमे वैयाकरणपाणिनिना विहिता अथवा केनापि अन्येन पाणिन्यभिधेयेन। यतोहि डो. भाण्डारकर-पीटर्सनादिपाश्चात्यविद्वांसः जाम्बवतीविजयस्य उपलब्धोद्धरणानां लालित्यपूर्णां सरसां रचना क्वचिच्च व्याकरणस्योत्सर्गनियमोल्लघनं दृष्ट्वा कथयन्ति यत् काव्यमेतत् शुष्कवैयाकरण-पाणिनेः कृतिः नास्ति। वस्तुतः असत्यमेवैतत् कल्पनं पाश्चात्यानाम्। भारतीयवाङ्मयेऽसन्दिग्धरूपे काव्यमेतत् वैयाकरणपाणिनेरेव रचना स्वीकृता। अनेकैः वैयाकरणैः अष्टाध्याय्याः अप्रसिद्धशब्दानां साधुत्वदर्शनाय काव्यमदः पाणिनीयं मत्वा उद्धृतम्[२]। विषयरचनाभेदेन च भाषायां भेदः स्वाभाविकमेव। यथा कवि-हर्षेण खण्डनखाद्यं कर्णकटुग्रन्थं यत्र व्यरचि तत्रैव सरसं मधुरं महाकाव्यं नैषधमपि व्यरचि, तर्हि उभयोः भाषयोः पार्थक्यत्वात् लेखकोऽपि पृथक्-पृथक् इति नैव वक्तुं शक्यते तथैवात्र पाणिनिविषये विद्यते। यदि शुष्कं व्याकरणं तर्हि सरसं जाम्बवती विजयमपि तेनाकारि। पाश्चात्यमतं परित्यज्य पाश्चात्य विद्वान्सः डो. औफ्रेक्ट, डो. पिशलादयः मन्वते यत् पाणिनेः हृद्देशः कमनीयकाव्यकलायाः सुकुमार-आकरः। सत्यकामवर्मामहोदयः अपि ब्रवीति-स्वकीये 'संस्कृत व्याकरण का उद्भव और विकास' इत्याख्ये ग्रन्थे-यत् काव्यमेतत् पाणिनिरेव कृतिः, नान्यस्य वैयाकरणभिन्नस्य कस्यचित्। अपि च 'ऋग्वेदेऽलंकाराः' नामके ग्रन्थे डो. प्रहलादकुमारेण लिखितम् पाणिनीयतन्त्रे उपमालंकारस्य सांगोपांगविवेचनं नयनगोचरीभवति (पृ. ८४)।

द्विरुपकोश अपि पाणिनेः अन्यतमः ग्रन्थः। लन्दनदेशस्य इण्डिया ओफिस पुस्तकालये द्विरुपकोशस्य एकः हस्तलेखः वर्त्तते। तस्मिन् अन्ते – 'इति पाणिनिमुनिना कृतं द्विरुपकोशं सम्पूर्णम्' इति लिखितमस्ति, तस्माज्ज्ञायते यत् द्विरुपकोश अपि पाणिनेरेव कृतिरिति।

१. त्वया सहार्जितं यच्च, यच्च सख्यं पुरातनम्।
चिराय चेतसि पुरूतरूणीकृतमद्य मे।। – दुर्घटवृत्ति ४/३/२३.

## ।। सिद्धहेमशब्दानुशासनस्यपरिचयः ।।

किन्नामानुशासनम्? इति जिज्ञासायां अनुशिष्यन्ते - व्युत्पाद्यन्ते शब्दाः अनेन अथवा असाधुशब्दाऽवधिकसाधुशब्दकर्मकपृथक्कृतिप्रयोजनानुकूलो व्यापारः अनुशासनम्। येन शास्त्रेण शब्दानां नियमनङ्क्रियते शब्दाः व्युत्पाद्यन्ते च तादृशं यत् तदेव अनुशासनम् इति।

शब्दानामनुशासनम् - शब्दानुशासनम्, हेम्नः सुवर्णस्य परीक्षायां सिद्धत्वात् सिद्धहेम इति। अथवा गुर्जरप्रान्तीयराज्ञः सिद्धराजस्यादेशानुसारम् आचार्यहेमचन्द्रसूरिणा कृतं शब्दानुशासनं सिद्धहेमशब्दा-नुशासनम्।

संस्कृतप्राकृतशब्दानाम् अनुशासनम् अष्टाध्यायिरूपेण विरचितेऽस्मिन् व्याकरणे अतिसुष्ठुरूपेण ग्रथितं वर्तते। अत्र अष्टावध्यायाः, प्रत्यध्यायं चत्वारः पादाः, प्रतिपादं च कतिपयानि सूत्राणि सन्ति। तत्र कस्मिन्नध्याये कस्मिंश्चपादे कियन्ति सूत्राणि इत्येतद् निम्नलिखितकोष्ठकाज्ज्ञातव्यम्।

| अध्यायः | पादः १ | पादः २ | पादः ३ | पादः ४ | सम्पूर्ण संख्या |
|---|---|---|---|---|---|
| प्रथमोऽध्यायः | ४२ | ४१ | ६५ | ९३ | २४१ |
| द्वितीयोऽध्यायः | ११८ | १२४ | १०५ | ११३ | ४६० |
| तृतीयोऽध्यायः | १६३ | १५६ | १०८ | ९४ | ५२१ |
| चतुर्थोऽध्यायः | १२१ | १२३ | ११५ | १२२ | ४८१ |
| पञ्चमोऽध्यायः | १७४ | ९३ | १४१ | ९० | ४९८ |
| षष्ठोऽध्यायः | १४३ | १४५ | २१९ | १८५ | ६९२ |
| सप्तमोऽध्यायः | १८७ | १७२ | १८२ | १२२ | ६७३ |
| अष्टमोऽध्यायः | २७१ | २१८ | १८२ | ४४८ | ११९९ |

अत्र सप्तसु अध्यायेषु संस्कृतव्याकरणं समाकलितम्। अष्टमे तु प्राकृत शौरसेनी मागधी-पैशाची चूलिकापैशाची अपभ्रंश भाषाणां व्याकरणं वर्तते। यथा पाणिनीयव्याकरणे वैदिकव्याकरणत्वेन अष्ट-माध्यायस्य प्रसिद्धिः तथैवात्र प्राकृतव्याकरणत्वेनाष्टमाध्यायस्य प्रसिद्धिः।

सर्वसंख्यया ४६८५ सूत्राणि वर्तन्ते। तत्र ३५६६ संस्कृतव्याकरणसूत्राणि, ११९९ प्राकृतव्याकरण-सूत्राणि।

।। अत्रायं प्रकरणविभागः।।

| | | | |
|---|---|---|---|
| १ | संज्ञाप्रकरणम् | अध्याय-१ | पाद-१ |
| २ | स्वरसन्धिप्रकरणम् | अध्याय-१ | पाद-२ |
| ३ | व्यञ्जनसन्धिप्रकरणम् | अध्याय-१ | पाद-३ |
| ४ | नामप्रकरणम् | अध्याय-१,२ | पाद-४,१ |
| ५ | कारकप्रकरणम् | अध्याय-२ | पाद-~~१~~ 2 |
| ६ | षत्वणत्वप्रकरणम् | अध्याय-२ | पाद-~~२~~ 3 |
| ७ | स्त्रीप्रत्ययप्रकरणम् | अध्याय-२ | पाद-~~३~~ 4 |
| ८ | समासप्रकरणम् | अध्याय-३ | पाद-४ |
| ९ | आख्यातप्रकरणम् | अध्याय-३,४ | पाद-१,४ |
| १० | कृदन्तप्रकरणम् | अध्याय-५ | पाद-१,४ |
| ११ | तद्धितप्रकरणम् | अध्याय-६,७ | पाद-१,४ |
| १२ | प्राकृतव्याकरणम् | अध्याय-८ | पाद-१,४ |

सकलेऽपि व्याकरणे आचार्यपादैः स्वयमेव विस्तृता वृतिर्विरचिता, सा इयं वृतिः स्वविरचित-वत्यन्तरापेक्षया महत्त्वाद् बृहद्वृत्तिरिति प्रसिद्धा। सप्तसु अध्यायेषु स्वोपज्ञवृतित्वेन प्रसिद्धा अपरास्तिस्रो लध्व्यो वृत्तय उपलभ्यन्ते। एका लघुवृतित्वेन अत्यन्तं प्रसिद्धाऽस्ति। अपरा मध्यमवृत्तित्वेन सम्प्रति कतिपयैर्व्यवह्रियते। इयं च लघुवृत्तित्वेन प्रसिद्धायाः वृत्तेः किञ्चिद् बृहत्तरा अन्या तु रहस्यवृत्तित्वेन प्रसिद्धा, इयं तु अतिसंक्षिप्ता।

**प्रथमाऽध्यायः। प्रथमपादः**

प्रथमे प्रथमं सूत्रम् 'अर्हम्' (१/१/१) एतद् मङ्गलार्थकम् द्वितीयम् महत्वपूर्ण सूत्रम् 'सिद्धिः स्याद्वादात्' (१/१/२) अनेन सूत्रेण आचार्येण शब्दानां सिद्धिः - निष्पत्तिर्ज्ञप्तिश्च अनेकान्तवादेनैव उरीकृता नैकान्तेन। सत्यमेव शब्दानां सिद्धिः स्याद्वादसिद्धान्तेनैव भवति नैकान्तेन।

'लोकात्' (१/१/३) तृतीयेऽस्मिन् सूत्रे आचार्येण उक्तम् – यन्मयानोक्तमत्र तद् लोकाद्-वैयाकरण-नैयायिकादेः वेदितव्यम्। एतेन सूत्रेण आचार्यस्य सरलता अहङ्कारशुन्यता च दृश्यते। मुख्यतया प्रथमः पादः संज्ञाविधायकः तत्र प्राधान्यरुपेण परिगणिताः संज्ञाः।

१ स्वरः, २ ह्रस्वः, ३ दीर्घः, ४ प्लुतः, नामी, समानः सन्ध्यक्षरम्, अनुस्वारः, विसर्गः, व्यञ्जनम्, धुट्, वर्गः, अघोषः, घोषवान्, अन्तस्था, शिट्, स्वः, प्रथमादिः, विभक्तिः, पदम्, वाक्यम्, नाम, अव्ययम् संख्यावत्। एतासु संज्ञासु पदाव्ययसंख्याव्ययवतां विशेषरुपेण विवेचनं कृतमस्ति। यथा स्याद्यन्तं त्याद्यन्तञ्च पदमित्युक्ते भवदीयः, पयोभ्याम् इत्यादिषु स्थलेषु भवदादिशब्दानाम्पदत्वं विहितम्वर्तते अव्ययसंज्ञायाः सामान्यनिरुपणानन्तरं १-१-३१ तः १-१-३६ सूत्राणि यावत् विशेषरुपेण निरुपणमस्ति। संख्यावत् संज्ञायाः सामान्यनिरुपणानन्तरं पादस्य अन्तिमं सूत्रं यावत् विशेषरुपेण विधानम्। वृत्तौ स्वयमाचार्येण उक्तसंज्ञानां स्पष्टीकरणङ्कृतम्। अत एव स्पष्टम् प्रथमे पादे केवल संज्ञानामेव निरुपणम्।

**द्वितीयः पादः।।**

संज्ञा प्रकरणस्य पश्चात् वर्णकार्यस्य विवेचनम् - सर्वप्रथमं दीर्घकार्यं विहितम्। यथा 'समानानां तेन दीर्घः' तत्पश्चात् क्रमशः गुणः वृद्धिः, पूर्वलुक्, यण्, अयादि, परलुक्, अवसन्धिः, असन्धिः एवं अनुनासिक इति रीत्या स्वरसन्धीनां सम्यग् विवेचनम् वर्तते।

**तृतीयः पादः।।**

तृतीयेऽस्मिन् पादे व्यञ्जनसन्धिः निरुपितः। पश्चात् विसर्गसन्धेः कतिपयनियमाः। व्यञ्जनसन्धौ विसर्गसन्धेरन्तर्भावः। तदनन्तरं व्यञ्जनलुक् प्रकरणम्। तदनु य विधानम् छ विधानम्, द्वित्वविधानम् ढलोपविधानम्, सलोपविधानम्, सलोपविधानम्, विपर्ययः, विसर्गविधानम्, तवर्गस्य चवर्गः, तवर्गस्य टवर्गः, तवर्गस्य ल् विधानम् इत्यादिकमत्रैव अस्मिन् पादे द्वित्वविधानप्रक्रिया विस्तारेण विहिताऽस्ति।

**चतुर्थपादः।।**

अस्य पादस्य 'अतः आः स्यादौ जस्भ्याम्ये' इति सूत्रात् स्याद्यन्तप्रकरणस्य प्रारम्भः। प्रारम्भे अकारान्तपुलिङ्गशब्दानां सिद्धिः। पश्चात् इकारान्तोकारान्तानां व्यञ्जनान्तानां च शब्दानां नियमनम्।

**द्वितीयाऽध्यायः। प्रथमपादः**

पादारम्भः 'त्रिचतुरस्तिसृचतसृ स्यादौ' (२/१/१) इति सूत्रात् अस्मिन् पादे व्यञ्जनान्तशब्दानाम् अनुशासनम्। प्रथमाऽध्यायस्य चतुर्थः पादः, द्वितीयाऽध्यायस्य च प्रथमः पादः एतयोः द्वयोः पादयोः प्राधान्येन षड्लिङ्गप्रकरणम् प्ररुपितम्।

**द्वितीयः पादः।।**

अस्मिन् पादे कारकप्रकरणम् प्रतिपादितम्। यथा पाणिनिना प्रारम्भे विभक्त्यर्थे 'कारके' इति अधिकारसूत्रं रचितम् किन्तु अनेन प्रथमम् एव 'क्रियाहेतुः कारकम्' इति सूत्रेण कारकस्य व्याख्या कृता तदनन्तरं षण्णां कारकाणां उपपदविभक्तीनां च। कर्मकारकस्य व्याख्यायाम् आचार्येण 'कर्तुर्व्याप्यं कर्म' कर्त्राक्रियया यद्विशेषेणाप्तुमिष्यते तत्कारकं व्याप्यं कर्म च स्यात् तत्त्रेधा निर्वर्त्यं विकार्यं प्राप्यञ्च पाणिनिना कर्तुरीसितमं कर्म कर्तुः क्रियया आप्तुम् इष्टतमं कर्मसंज्ञं स्यात्। द्वयोः तुलनया ज्ञायते यत् हेमचन्द्रेण पाणिनेः 'ईष्टतम' इत्यस्य व्याप्येऽन्तर्भावः कृतः। एवम्प्रकारेण कारकप्रकरणेदम् अतीव सरलं अस्ति। अत्र तु दिङ्मात्रेण निर्देशीकृतः विस्तारस्त्वग्रे विहितो वर्तते।

**तृतीयः पादः।।**

पादेऽस्मिन् मुख्यत्वेन सत्वविधेः, षत्वविधेः, णत्वविधेश्च प्रतिपादनम्। सत्वविधिः 'नमस्पुरसो गतेः कखपफिरः सः' इति सूत्रादारभ्य 'सुगः स्वसनि' सूत्रपर्यन्तम्। 'नामिनस्तयोः षः' (२/३/८) पर्यन्तम् षत्वविधिः। अनेन विधिना अव्ययेषु, समासेसु, पदाभ्यन्तरे, स्वतन्त्रपदेषु, पदादौ, धात्वादौ, धातुगतो- पसर्गसंयोगेषु, अर्थाविशेषधातुषु च रस्य सस्य च षत्वविधानम्। तदनु णत्वविधानारम्भः। एतद् विधानं २/३/६३ तः २/३/९७ पर्यन्तम्। तत्र समासकृदन्ततद्धिततिङन्तेषु उपसर्गादिसंयोगेषु भिन्नभिन्नावस्थानेषु च णत्वभावः दृश्यते। 'ऋरलृलंकृपोऽकृपीटादिषु' (२-३-९९) तः 'परेर्घाङ्कयोगे' (२/३/१०३) सूत्रं यावत् तत्वविधानम्। अस्यपादस्यान्तिमं सूत्रं 'जपादीनां पो वः' (२/३/१०५) अनेन वैकल्पिकरुपेण तत्वविधानम्। संक्षेपतोऽस्मिन् पादे षत्वणत्वलत्ववत्वादिविधीनां प्ररुपणमस्ति।

## चतुर्थपादः।।

अस्मिन् पादे स्त्रीप्रत्ययप्रकरणम्। समेषां स्त्रीप्रत्ययानां अनुशासनम्। स्त्रीप्रत्ययसहायकानि कानिचन तद्धितसूत्राण्यपि अत्रोपलभ्यन्ते किन्तु तेषां स्वतन्त्ररुपेणास्तित्वन्नास्ति। सहायकरुपेणैवतेषामुपस्थितिः। तदनु २/४/६६ सूत्रादारभ्य २/४/१०७ पर्यन्तं ह्रस्वप्रकरणम्। तदनन्तरम् इकारप्रकरणारम्भः, तद् साक्षाद् परम्परया वा स्त्रीप्रत्ययान्तशब्दसिद्धौ सहायकम्। अनेकस्त्रीप्रत्ययान्तशब्दसिद्धि अस्मिन् प्रकरणे। यथा स्विका, स्वका, ज्ञिका इत्यादि।

## तृतीयाऽध्यायः प्रथमपादः।।

अस्मिन् पादे प्रारम्भे धातोः प्राग् उपसर्गप्रयोगः इति निरुपणम्। 'उर्याद्यनुकरणेच्विडाचश्च गतिः' ३/१/२ इति सूत्रादारभ्य ३/१/१७ पर्यन्तं गतिसंज्ञाविधायकानि सूत्राणि प्रतिपादितानि। अस्य पादस्य प्रधानवर्ण्यविषयः समासः। पाणिनिना यत्कार्यं 'सहसुपा' (२/१/४) इति सूत्रेण कृतम् तत्कार्यमनेन 'नाम-नाम्ना०' इति नियमेन कृतम्। अत्रैकः प्रश्न उद्भवति यत् हेमचन्द्राचार्येण सामान्यसमासविधायकसूत्रेभ्यः प्राक् गतिसंज्ञकानि सूत्राणि कथं लिखितानि? सामान्यतः एतत् असंगतं प्रतीयते किन्तु सूक्ष्मेक्षिकया विज्ञायते यत् गतिसंज्ञाविधायकानि सूत्राण्यपि समासफलकानि अतः प्रथमं संग्रहात्मकं कार्यं समापितम्।

'गतिक्वन्यस्तत्पुरुषः' इति सूत्रं गतिसंज्ञकेषु समासस्य नियमनं करोति। पाणिनिना 'कुगतिप्रादयः' सूत्रेण यत् कार्यं कृतं तद् आचार्येणोक्तसूत्रेण। तत्पश्चात् (३/१/१७) सूत्रात् बहुव्रीहिसमासप्रकरणारम्भः। अत्र क्रमभङ्गः दृश्यते किन्तु तस्य समाधानं स्वयं हेमचन्द्रेण दत्तम् ३/१/१८ इति सूत्रवृत्तौ लक्षणमिदम-धिकारश्च तेन बहुव्रीह्यादिसंज्ञाऽभावे यत्रैकार्थता तत्रानेनैव समासः। अतः स्पष्टम् बहुव्रीहिसंज्ञाविधाय-कानिसूत्राणि प्राग् प्रदत्तानि। तदनन्तरम् अव्ययीभावविधायकानि सूत्राणि इत्येवमादयः सर्वे समासाः। द्वन्द्वसमासे एकशेषस्यात्यन्तं महत्वम्। एतत् द्वन्द्वस्यैव एकं विशेषस्वरुपम्। तत्पश्चात् 'प्रथमोक्तं प्राक्' (३/१/४८) सूत्रादारभ्य ३/१/१६७ सूत्रादारभ्य ३/१/१६३ सूत्राणि यावत् कस्मिन् समासे कः शब्दः प्राक् प्रयोज्यः एतत् सर्वमनुशासनमुपलब्धम्। एतत् पूर्वनिपातप्रकरणं विस्तृतम्।

**द्वितीयपादः।।**

अस्मिन् पादे समासस्य परिशिष्टचर्चाऽस्ति। समासानन्तरं समासनिमित्तकानि यथा - अम्, सुलुक्, ह्रस्वप्रभृतिनियमानाम् उल्लेखो वर्तते।

**तृतीयः पादः।।**

एषः पादः क्रियाप्रकरणसम्बन्धिनः अस्मिन् सामान्यतः वृद्धिगुणयोः धातुज्ञानस्य चावश्यकता भवति। हेमचन्द्रस्य क्रियाप्रकरणेन पाणिनिरीत्यानुसारं अपितु कलापस्य कातन्त्रस्य रीत्यानुसारं वर्तते। कातन्त्रेण समाना आचार्येणाऽपि क्रियायाः दश अवस्थाः स्वीकृताः। १) वर्तमाना २) सप्तमी ३) पञ्चमी ४) ह्यस्तनी ५) अद्यतनी ६) परोक्षा ७) आशीः ८) श्वस्तनी ९) भविष्यन्ती एवं १०) क्रियातिपत्तिः। पाणिनिना समं लकाराणां विधानम् अत्र नास्ति।

**चतुर्थः पादः।।**

अस्मिन् पादे प्रत्ययविशिष्टधातूनां विवरणम्। यथा कण्डूय, गोपाय इत्येतेऽपि धातुत्वेनोद्धृताः। पाणिनिनाऽपि 'सनाद्यन्ता धातवः' सूत्रेणोक्तम्। अत्र धातूनां सर्वे स्वार्थिकप्रत्ययाः यथा आय, णिङ्, ङीप्, सन्, यक्, यङ्, णिच्, काम्य क्वन्, क्विम् क्वङ् इत्यादि।

**।। तुरीयाध्यायः प्रथमपादः।।**

पादारम्भे एव द्वित्वविषयः निरुपितः। द्वित्वविषये यत्र कुत्रापि धातौ विकृतिः भवति तस्यापि निर्देशः कृतः।

**द्वितीयः पादः।।**

प्रथमपादे प्रत्ययपूर्वस्थितधातुषु विकारानुशासनम् विहितम्। तद् प्रकरणानुसन्धानेनैवास्य पादस्यारम्भः। तत्पश्चात् धातूनां नकारान्तलकारान्तजकारान्त-यकारान्तह्रस्वान्तेकारान्तादिविविधविधानानां निरुपणम्।

**तृतीयः पादः।।**

अस्मिन् पादे विशेषतः गुणवृद्ध्योः नियमनम् अस्ति। पश्चाद् एनयो र्निषेधः।

इकारस्य यकारः उकारस्य च वकारः। पश्चात् कित् ङित् विधानम् तत्फलम् गुणनिषेधः अनुनासिकव्यञ्जनलोपश्च। गुणाव्यवहितोत्तरवृद्धिप्रसङ्गः। सिच् विधानम्। एवं प्रकारेण धातुसम्बन्धिभिन्नविकाराणामनुशासनं कुर्वन् पाद समाप्तिः।

**चतुर्थः पादः।।**

अस्यपादस्यारम्भः आदेशविधानेन, आदेशविधानसम्पादकानि कार्याणि 'अस्तिब्रुवोभूवचावशिति' इति सूत्रादारभ्य ४/४/२९ सूत्रं यावत्। आख्यातसम्बन्धि-समस्तनियमोपनियमानामत्र उपसंहाररुपेण वर्तते।

**पञ्चमाऽध्यायः प्रथमः पादः।।**

पादस्यारम्भः कृत्संज्ञाविधायकाधिकारसूत्रतः भवति। 'आतुमोऽत्यादिः कृत्' ५-१-१ धातोर्विधी-यमानस्त्यादिवर्ज्यो वक्ष्यमाणः प्रत्ययः तुमभिव्याप्य कृत् स्यात्। प्रारम्भे एकादशसूत्राणि कर्त्रर्थे प्रत्यय-विधायकानि पश्चाद् आधारे क्तविधानम्। धात्वर्थमात्रे क्त्वातुमम् प्रत्ययविधिः। घ्यण्तव्यानीयक्यप्ण्क्तृच् अच् अन् णिन् क-णाऽकद् यक टनण् अक-अकन् तिक् अण् णटकादीनां विधानम्। अन्तिमं सूत्रं 'क्तक्तवतू' (५/१/१७४) भूतार्थाद् धातोः एतौ स्याताम्।

**द्वितीयः पादः।।**

प्रथमेन सूत्रेण 'श्रुसदवस्भ्यः परोक्षा वा ५/२/१ सूत्रेण परोक्षायाः विधानम्। सामान्यतया अस्य सूत्रस्य सम्बन्धः न कृदन्तेन सह परन्तु परोक्षया सह तस्य सम्बन्धत्वात् कृदन्तेन सह सम्बन्धः। पश्चाद् क्वसुकानौ तदनु अद्यतनीह्यस्तनीभविष्यन्तीनां विधानम्। अग्रे वयः शक्तिशीले' ५/२/२४ इत्यतः आरभ्य ५/२/८४ पर्यन्तं शीलादि सदर्थाधिकारः प्रवर्तते। प्रान्ते करणार्थे इत्र त्रट् इत्यादीनां विधिः सदर्थे च केषुचन अर्थेषु क्तप्रत्ययविधानम्।

**तृतीयः पादः।।**

| | | | | |
|---|---|---|---|---|
| भविष्यति | - | इन् निपातनम् | - | १ |
| भविष्यति | - | क्तविधानम् | - | २/३ |

(त्यादिविभक्तिसूत्राणि ८-१३)

| | | | | |
|---|---|---|---|---|
| भविष्यति | - | भविष्यन्ती | - | ४ |
| भविष्यति | - | श्वस्तनी | - | ५/६ |
| भविष्यति | - | वर्तमाना | - | ७/११ |
| भविष्यति | - | वर्तमाना पञ्चमी च | - | १२ |
| भविष्यति | - | भविष्यन्ती तुम् णकय् च | - | १३ |
| भविष्यति | - | कर्मपूर्वकाद् अण् | - | १४ |
| भविष्यति | - | भाववचना घञादयः | - | १५ |
| कर्त्तरि | - | घञ् | - | १६/१७ |
| भावाकर्त्रोः | - | घञ् | - | १८/२२ |
| भावाकर्त्रोः | - | अल् | - | २३/३७ |
| करणे | - | अल् | - | ३८/४० |

भावकर्त्रोः अल् घञ्क - अथु - त्रिमक् न नङ् किप्रत्ययानां विधानं क्रमशः। भावे नञिन् प्रत्ययौ। तदनन्तरं भावकर्त्रोः स्त्रियां क्तिविधानम्। पश्चाद् भावाऽकर्त्रोः क्यप्शय-अ-अङ् अनविधानम्। तदनु भावे क्लीबे, कर्तरि, कर्मोपादाने, करणाधारे च अनट्घञादीनां विधानम्। तदनु धातोः स्वरुपेऽर्थे च इकिश्तिव्विधानम्। कृच्छ्राकृच्छ्रात् दुःस्वीषतः पराद् धातोः खल् विधानम्।
कृच्छ्राकृच्छ्रात् पराद् भू-कृगः अनविधानम्।

इत्येवं रीत्या तृतीयः पादः पूर्णः।

**चतुर्थः पादः।।**

चतुर्थेऽस्मिन् पादे वर्तमानसामीप्ये वर्तमानावद् वा प्रत्ययाः,
आशंस्ये भूतवद् वर्तमानावष्व प्रत्ययाः
आशंस्ये क्षिप्रार्थे उपपदे-भविष्यन्ती, आशंसार्थे उपपदे च सप्तमी।

सम्भावने सिद्धयत् प्रत्ययाः, अनयतनविहितप्रत्ययाभावः, भविष्यति-क्रियातिपत्तिः, भूते क्रियातिपत्तिः, वर्तमाना, वर्तमान सप्तमीच, पञ्चमी कृत्याश्च, णिन् कृत्याश्च, आशीः पञ्चमी च, अद्यतनी हयस्तनी च, एवम्प्रकारेण विभक्तीनाम् विधानम्, पश्चात् धातुसम्बन्धे-अयथाकालमपि प्रत्ययाः, आभीक्ष्ण्ये सर्वविभक्तिवचने

हिस्वौ तद्युष्मदि च तधामौ यथाविधि।
सामान्यार्थधातुसम्बन्धे समुच्चये तु वा। पश्चात्
क्त्वा ख्णम्णम्तुमादीनां विधानङकृत्वा परिसमाप्यतेऽत्र चतुर्थः पादः।

**षष्ठाध्यायः प्रथमः पादः।।**

इतः तद्धित प्रकरणस्य प्रारम्भः। तस्मै-लौकिकवैदिकशब्दसन्दर्भाय हितः अथवा ताभ्यः प्रकृति-वृत्तिभ्यः हितः तद्धितः। 'तद्धिते मूढो वैयाकरणः' इति प्रत्ययानां विस्तारबाहुल्यात् यथार्थोक्तिः। किन्तु आचार्येण स्वतद्धितप्रकरणं सक्षेपेण निरुपितम्।

हेमचन्द्रेण पूर्वाध्यायस्य प्रथमपादारम्भे 'आतुमोत्यादिः कृत्' (५/१/१) सूत्रद्वारा के प्रत्ययाः कृदन्ताः तस्य परिज्ञानं कारितम्। तद्वत् अत्रापि तद्धितप्रत्ययानां सम्बन्धे 'तद्धितोऽणादिः' (६/१/१) इति अधिकारसूत्रोऽयं वर्तते। अर्थात् अणादिवक्ष्य-माणप्रत्ययाः भवन्ति तान् संयुज्य ये शब्दाः संसिद्ध्यन्ते। ते तद्धितसंज्ञकाः वेदितव्याः। एषा सामान्यसंज्ञा वर्तते। काश्चनविशेषप्रसङ्गैः वृद्धयुवादिसंज्ञारुपेण निर्दिष्टः।

तद्धितप्रत्ययेषु पूर्वम् अण् प्रत्ययो वर्तते। पाणिनिः अपत्यमात्रे अण् प्रत्ययं कृत्वा 'तस्यापत्यम्' (४/१/९२) सूत्रं लिखितवान्। हेमचन्द्रस्य सर्वाणि सूत्राणि विशेषरुपेणैव वर्तन्ते। आचार्येण अण् प्रत्ययानन्तरं ञप्रत्ययस्य नियमनम् अकारि। एतद् 'अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युतरपदाञ्ञः' (६/१/१५) सूत्रतः प्रारभते। 'बहिषष्टीकण् च' (६/१/१६) सूत्रेण टीकण्त्र्य प्रत्ययौ विधाय बाहिकः, बाह्यः इत्येतद् प्रयोगद्वयं साधितम्। तदनु ६/१/१७ सूत्रद्वारा कलि एवं अग्निशब्दात् एयण् प्रत्ययं अनुशिष्य कालेयम् तथा आग्नेयम् इति शब्दानां सिद्धिः प्रदर्शिता। पृथिव्या माऽञ् ६/१/२७ सूत्रेण ञ तथा अञ् प्रत्ययं कृत्वा स्त्रियां पार्थिवा पार्थिवी च प्रयोगौ निष्पादितौ। 'उत्सादेरञ्' (६/१/१९) सूत्रेण उत्सादिशब्देभ्यः अञ् प्रत्ययं विधाय औत्सः, औदपानम् इति उभौ प्रयोगौ परिनिष्ठितौ। अञ् प्रत्ययाधिकारः अग्रिमसूत्रेऽपि प्रवर्तते।

६/१/२१ सूत्रे देवशब्दात् यञ्-अञ् प्रत्यययोः विधानं कृत्वा देव्यदेवौ प्रयोगौ साधितौ। 'अः स्थाम्नः' (६/१/२२) 'लोम्नोऽपत्येषु' (६/१/२३) सूत्रद्वारा 'अ' प्रत्ययस्य अनुशासनं कृत्वा अश्वत्थामः उडुलोमाश्च साधितौ। द्विगोरनप्रत्ये यस्वरादेर्लुबद्विः

६/१/२४ सूत्रे लुब्विधिः वर्तते।

(६/१/२५) सूत्रेण 'भव' अर्थे स्त्रीपुंशब्दाभ्यां नञ् तथा स्नञ् प्रत्ययौ विधाय स्त्रैणः पौस्नः च प्रयोगौ विहितौ। 'त्वे वा' (६/१/२६) सूत्रम् भावविषये विकल्पेण पूर्वनिर्दिष्टप्रत्ययौ वर्तते। 'गोः स्वरे यः' (६/१/२७) सूत्रेण यप्रत्ययं कृत्वा गव्यम् साधितम्। पश्चात् अपत्यार्थे अणादिप्रत्ययं विधाय औपगवादिशब्दाः निर्दिष्टाः। 'अतइञ्' (६/१/३१) सूत्रेण अदन्ताङ्गात् इञ्प्रत्ययद्वारा दाक्षिः प्रयोगः साधितः। हेमचन्द्रस्य इदं कथनं पाणिनेः 'अतइञ्' (४/१/१५) सदृशं वर्तते। उभयोराचार्ययोः अनुशासनस्य सूत्राणि रुपाणि च प्रायः समानानि सन्ति। हेमचन्द्रस्य इञ् प्रत्ययाधिकारः 'व्यासवरुटसुधातृनिषादनिम्नचाण्डालादन्तस्य चाऽऽक्' (६/१/३९) सूत्रपर्यन्तं वर्तते। अत्र पाणिनि व्याकरणे वार्तिकसूत्रं वर्तते। 'गर्गादेर्यञ् व्यास गरुड निषाद चाडालबिम्बाच्येति वक्तव्यम्' (६/१/४२) सूत्रात् यञ् प्रत्ययः 'वतण्डात्' (६/१/४५) पर्यन्तं प्रवर्तते। 'कुञ्जादेर्ञायन्यः' ६/१/४७ सूत्रेण ञायन्यः एवं (६/१/४८) सूत्रेण आयनञ्प्रत्ययः अनुशिष्टः। 'नडादिभ्यआयनण्' (६/१/५८) सूत्रतः 'द्रोणाद्वा' ६/१/५९ सूत्रपर्यन्तं आयनण् प्रत्ययस्य अनुशासनं वर्तते। 'शिवादेरण्' (६/१/६०) सूत्रतः अपत्यार्थकाण्प्रत्ययस्य प्रकरणं प्रारभते। प्रकरणमिदम् 'पिलासल्वामण्डूकाद् वा' (६/१/६८) पर्यन्तं प्रवर्तते। पुनः अपत्यार्याकस्य एयण् प्रत्ययस्य आरम्भो भवति। अपत्यार्थकथनं 'कुलटाया वा' (६/१/७८) सूत्रपर्यन्तं प्रचलति। तदनु 'चटकाण्णैरः स्त्रियां तु लुप्' ६/१/७८ सूत्रेण णैरप्रत्ययस्य एवं च 'गोधाया दुष्टे णारश्च' (६/१/८०) 'जण्टपण्टात्' (६/१/८१) सूत्रसहाय्येन एयण् प्रत्ययस्य विधानमकरोत्। तदनन्तरम् अपत्यार्थे णारः, एयञ्, एयण्, इकण्, णेकणः, व्य, ईय, डेय, णीयण य इय या ईन एयकञ् अञ् ईनञ् ञ्च इञ् आयनिञ् युनीकण्, द्विसंतकोऽण् ञ्च अञ् इञादि प्रत्ययाः व्यधीयन्त। आयन् प्रत्ययस्य नियमनं 'दगुकोशलकर्मारच्छागवृषाद् यादिः' (६/१/१०८) सूत्रेण आरभ्य 'राष्ट्रक्षत्रियाद् 'सरुपाद् राजापत्ये द्विरञ्' (६/१/१४) सूत्रपर्यन्तं प्रचलति। हेमचन्द्रः 'शकादिभ्यो द्रेर्लुप्' (६/१/१२०) सूत्रतः प्रत्ययस्य लुब्विधिमारभते। एषः विधिः पादपर्यन्तं प्रचलति।

अस्यपादस्य अधिकांशसूत्राणि पाणिनिना भावपक्षे शब्दपक्षे ना उपयपक्षे सादृश्यमूलकानि सन्ति। समीक्षार्थं कतिपयसूत्राणि अत्र उद्धृतानि सन्ति।

**द्वितीयपादः।।**

अस्मिन् पादे रक्तसमूहावयव-विकारादिषु अर्थेषु प्रत्ययाणां विधानं वर्तते। 'रागाट्टो रक्ते' (६/२/१) रज्यते येन कुसुम्भादिना तदर्थात् तृतीयान्तात् रक्तमित्यर्थे यथाविहितः प्रत्ययः स्यात्। अर्थात् अनेन आरम्भिकसूत्रेण रक्तादिषु अर्थेषु यथाविहितप्रत्ययाणां विधानार्थं प्रतिज्ञामकरोत्। एतद् रक्तार्थकप्रकरणं 'उदितगुरोभाद् युक्तेऽब्दे' (६/२/५) सूत्रपर्यन्तं प्रचलति। चन्द्रात् काले, लुप् - ६/२/६ सूत्रतः 'श्रावणाऽश्वत्थान्नाम्यः' (६/२/८) सूत्रपर्यन्तं कालार्थे प्रत्ययाणां त्वप्रयुक्ते नियमनं वर्तते। तदनु 'षष्ठ्याः समूहे' (६/२/९) सूत्रतः 'पुरुषात् कृत-हित-वध-विकारे चैयञ्' (६-२-२९) सूत्रपर्यन्तं समूहादिषु अनेकार्थेषु प्रत्ययाणां निरुपणं वर्तते। तदनन्तरं 'विकारे' (६/२/३०) सूत्रतः विकारार्थकप्रत्ययाः सन्ति। एते प्रत्ययाः अवयवार्थकाः अपि सन्ति। एषा परम्परा न द्विरद्रुक्य-गोमय-फलात् पर्यन्तमस्ति। अग्रे भातृदुग्ध-राष्ट्र-निवसाद्यर्थे चातुरदेवता साऽस्य देवताप्रहरण-तद्वति-तदधीत-सामेत्य-व्रति-भक्ष्याद्यर्थे अपत्यादिभिन्नार्थे च प्रत्ययाणां विधानमास्ते। अस्य पादस्य अन्तिमसूत्रं 'क्वचित्' (६/२/१४५) अपत्यादिभ्योऽन्यत्राप्यर्थे क्वचिद् यथाविहितं प्रत्ययः स्यात्। यथा–चक्षुषे इदम् चाक्षुषम् रुपम्, अश्वाय अयम् - आश्वः रथः।

**तृतीयपादः।।**

अस्य पादस्य प्रथमं सूत्रं 'शेषे' ६/३/१ वर्तते। अस्य तात्पर्यमस्ति यत् अपत्यादिभ्यो भिन्नार्थे प्राग्जातीयार्थे वक्ष्यमाणप्रत्ययाः भवन्ति। पादेऽस्मिन् एयण्–इय एत्य ईन य एयकञ्, त्यण्, टापनाण्, त्यच्, इकण्, अकञ्, अण्, अञ्, इवस्, अकीय, ईय णिक् अञ् ईनञ् ण्य य इय म अ च रन न तन एण्यादिप्रत्ययाः वर्तन्ते। अमुस्मिन् पादे २१९ सूत्राणि सन्ति, तथा च एषु सूत्रेषु तद्धितीयप्रत्यया अनुशासिताः। एतद् अनुशासनम् अन्यानुशासनेन सममेवास्ते।

प्रायः अस्मिन् प्रकरणे दृश्यते यत् सरुपप्रत्ययविधायकानि सर्वाणि सूत्राणि एकस्मिन्नेव स्थले न सन्ति। अस्य प्रधानं कारणं वर्तते यत् हेमचन्द्रः प्रत्ययाणाम्

अर्थानुसारणीं गुम्फितवान्, अर्थात् एकस्मिन् विशेषार्थे यावन्तः प्रत्ययाः भवन्ति तेषां समेषां प्रत्ययाणां निरुपणं तत्र अर्थविशेषे कृतवान्। एकश्च यदा अर्थान्तरस्य प्रकरणं प्रारभते तदा तस्मिन् अर्थे प्रयुज्यमानि प्रत्ययविधायकानि सूत्राणि तत्र समुपतिष्ठते। अत एव एकस्यैव प्रत्ययविधायकसूत्रस्य अनेकेषु स्थलेषु उपस्थितिः न अयुक्तिसङ्गतः। रीतिरेषा हेम्नः परानुशासनेभ्यो भिन्ना। यत्र पाणिन्यादयः शब्दानुशासकाः एकप्रत्ययविधायकसूत्राणा।

अतः एकप्रत्ययविधायकसूत्रम् एकमैव न समागतम्। हेमचन्द्रस्य प्रत्ययविधायकीं सूत्रशैलीं विना उररीकृत्य साधारणपाठकेषु क्रमराहित्य अव्यवस्थाभङ्गादिदोषाः उद्भवेयुः। किन्तु! आद्योपान्तम् अस्यपादस्य पर्यवेक्षणेन एषा शङ्का दूरीभवति।

**चतुर्थः पादः।।**

पादमिदम् शेषार्थकमेव। अत्र संस्कृताद्यर्थे दाधिकम्, वैधिकम् इत्यादीनां परिनिष्पत्तिः। तदनु 'संसृन्हे' (६/४/९), तरतत्र (६/४/९), चरति (६/४/११), जीवति (६/४/१५) निर्वृत, हरति, वर्तते, हनति, तिष्ठति, गृह्णाति, गच्छति इत्याद्यर्थे प्रत्ययाणां विधानं विद्यते।

**सप्तमाध्यायः प्रथमः पादः।।**

अत्र प्रथमे पादे 'यः' (७/१/१) इति सूत्रम्। तत्र ईयादर्वात्र् 'य' इत्यधिकृतं ज्ञेयम्। तदनु वहत्यधिकारः, विध्यत्यनन्येनेत्याद्येर्थेषु यादिप्रत्ययविधानम्, सप्तसूत्राणि साधवर्थाधिकारे तदर्थार्थाधिकारे सूत्रत्रयम्। २५ तः ३८ सूत्राणि आतदोऽर्थोधिकारः तस्मै हितार्थाधिकारः, तदर्थाद्यर्थाधिकारः, तत्पश्चात्-५१ तः ५४ सूत्राणि वत्प्रत्यय-विधायकानि।

'भावे त्वतल्' (७/१/५५) इति सूत्रेण त्वतल्विधानं कृत्या भावाधिकारः, प्रारब्धः। तदनु भाषकर्मार्थाधिकारः। 'शाकटशालिनौ क्षेत्रे' (७/१/७८) तः १०७ पर्यन्तः क्षेत्राद्यर्थाधिकारः। पश्चात् प्रमाणाद्यर्थाधिकारः।

संख्यापूरणे डट् ७/१/१५५ सूत्रतः संख्यापूरणाद्यर्थाधिकारः।

**द्वितीयः पादः।।**

द्वितीयेऽस्मिन् पादे 'तदस्यास्त्यस्मिन्निति मतुः' (७/२/१) इति सूत्रात् (७/२/७४) सूत्रं यावत् मत्वर्थाधिकारः। तत्पश्चात् प्रकारार्थाधिकारः, भूतपूर्वार्धाधिकारः, व्याश्रयाद्यर्थेषु–तस्वादिप्रत्ययविधानम्, प्रकाशद्यर्थाधिकारः, वारार्थाधिकारः, वारार्थाधिकारश्च। ७/२/११३ तः ७/२/१२५ सूत्रं यावत् दिग्देशाद्यर्थाधिकारः। च्व्याद्यश्थाधिकारस्य पश्चात् कृष्याद्यर्थे डाच्प्रत्ययादिविधानम्। तदनु १५३ सूत्रतः १७२ सूत्रं यावत् स्वार्थाधिकारेण द्वितीयः पादः पूर्णः।

**तृतीयः पादः।।**

अस्मिन् तृतीये पादे 'प्रकृते मयट्' सूत्रद्वारा प्रकृतेऽर्थे मयटादिप्रत्ययविधानम्। निन्द्येऽर्थे पाशप्प्रत्ययविधानम्, बहूनां मध्ये प्रकृष्टेऽर्थे तमप्–विधानम्, द्वयोर्मध्ये प्रकृष्टेऽर्थे तरप्विधानम्। स्वार्थे तरप् च। तदनु तरप्तमपोरन्तस्यामादेशः, तमप्तरपोर्विषये–इष्ठेयस्प्रत्ययोर्विधानम्, त्याद्यन्तान्नाम्नश्च प्रशस्तार्थाद् रुपप्प्रत्ययः, त्याद्यन्तान्नाम्नश्च किञ्चिदसमाप्तार्थाद् रुपप्प्रत्ययः, त्याद्यन्तान्नाम्नश्च किञ्चिदसमाप्तार्थाद्– कल्पप् दश्यप्देशीयर्प्रत्ययविधानम्, किञ्चिद्समाप्तार्थान् नाम्नः प्राग् बहुप्रत्ययविधानम्। इति विधानान्तरं तमबादेर्निषेधः, स्वार्थाद्यर्थेषु, कादिप्रत्ययानां विधानम्। तदनु ५२ तः ६४ सूत्राणि निर्धार्याद्यर्थाधिकारे।

समासान्तप्रकरणेन तृतीयः पादः परिसमाप्यते।

**चतुर्थः पादः।।**

वृद्धिः स्वरेष्वादेञ्णिति तद्धिते ७/८/९ सूत्रतः चतुर्थं सूत्रं यावत् वृद्ध्यादिविधानम्। य्वः प्रागैदौतोर्विधिनिषेधौ, वृद्ध्यधिकारः वृद्धिनिषेधविधानञ्च। णीष्ठादिप्रत्ययेषु लुषादिविधानम्। अन्त्यस्वरादेर्लुग्निषेधविधी। अदादीनां लुग्विधानम्, उवर्णस्याव्विधानम्, इकस्येतो लुग्विधानम्। तदनु संभ्रमे पदादीनामसकृत्प्रयोगः, द्विरुक्तिप्रकरणम्, प्लुतप्रकरणम्।

तदनन्तरं ७/४/१०४ तः ७/४/१२२ सूत्राणि

परिभाषा प्रकरणस्येत्थं सप्तमाध्यायोऽत्र पूर्णः।